॥अथाश्वलायनश्रौतसूत्रपूर्वषट्कस्यनारायणीवृत्तिः॥

॥ पत्र१९६॥

LIBRARY OF THE BOMBAY BRANCH OF THE ROYAL ASIATIC SOCIETY

॥श्रीमन्महागणपतयेनमः यज्ज्ञानानंदमूर्त्तिःसकलदिगतिगःसर्वदासन्ननन्यःसर्वस्मा-
१ त्स्वप्रकाशःस्थिरचरनिलयःप्रत्यगात्मासदेवः श्रौतस्मार्त्तक्रियात्माऽकृतिमननिदि-
ध्यासवैराग्यलभ्यःसब्रह्माविष्णुरीशःसकलमपिजगत्सर्वदाव्यादसोनः गुणदोषवि
निर्मुक्तंस्वप्रकाशमनाकुलंनीरबोधमानंदनमाम्यिब्रह्मशाश्वतं आश्वलायनसूत्र
स्यनाथंभगवताकृतं देवस्वामिसमाख्येनविस्तीर्णंसदनाकुलं तत्प्रसादान्मयेदा-
नीक्रियतेऽत्रिरीदृशी नारायणेनगार्ग्येणनरसिंहस्यसूनुना जयैत वक्ष्यामः तो-
कैयानिप्रत्यान्नायंप्रयोगशास्त्राणिस्मर्यंतेतान्यनुष्ठानोपयुक्ततयाध्ययनविधाक्षि
प्तत्वात्प्रत्यान्नायमंगत्वंप्रतिपन्नानि तत्रांगांगिनोरनुष्ठानकृतमानंतर्य्यमथशब्दोद्यो १
तयति एतस्मेतिशब्दोनिर्विषयुरोरुकुंतापवालखिल्यमहानाम्नेतरेयब्राह्मणस्

हितस्यशाकलस्यवाष्कलस्यचान्नायद्वयस्यएतदाश्वलायनसूत्रंनामप्रयोगशास्त्रमित्य
ध्येत्यसिद्धंसंबंधविशेषंद्योतयति समाम्नायस्येत्यच्यते एतस्मैवसम्यगभ्यासयुक्त-
स्येदंवंशास्त्रंनरिक्तानांसम्यगभ्यासरहितानामितिविततायज्ञयोयस्मिन्नितिश्रौतं
कर्माग्निहोत्रादिवितानशब्देनोच्यते समाम्नायस्यवितानइतिविशेषणाद्धौतेश्चवखि
लरहितत्वंगाह्येषुसखिलत्वमेवेतिज्ञायते योगायज्ञिःप्रयोगपरिणतिःप्रयोगस्वरू
पमित्यर्थः तंवक्ष्यामइतिब्रुवन्निदमेवशास्त्रंप्रतिपाद्यमितिदर्शयति तेनछंदोगप्र
त्ययग्राह्यस्तत्त्वादेस्तोत्रियत्वादिकार्यसंबंधएवात्रविहितत्वेनगृहीतोनतत्त्वादेः
स्वरूपमपितत्प्रत्ययमेवेतिप्रयोगएवशास्त्रस्यव्यापारोनतत्त्वादेःप्रयोज्यस्वरू
पेपीति एतदुक्तंभवति अध्ययनविधितएवोक्तलक्षणंसमाम्नायमधिगम्यानंत

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

रंश्रोतेकर्मण्येतादृक्समाम्नायविहितप्रयोगज्ञानायेदमपिशास्त्रमधिगंतव्यमिति
२ श्रोतेषुकर्मस्वेतादृक्समाम्नायविहितंप्रयोगापत्तिंवक्ष्यामइत्फक्रमिदानींतेषा
हिताग्नेरधिकारइत्यारु अग्न्या कानि अग्न्याधेयंप्रकृतिआदिःउपक्रमोयेषांतान्य
ग्न्याधेयप्रकृतीनि अग्निहोत्रादीनिकर्माण्याधानंकृत्वैवकर्तव्यानीत्यर्थः तत्रहेतुमा
रु वैतानिकानीतिवितानेशुनवानिवैतानिकानिवैतानिकानीति वितानसाध्यानीत्य
र्थः वितानशब्दोस्मिन्स्त्रेनावसाधनोग्नीनांविस्तारवाची स्त्रीस्मिंस्त्वधिकरणसाधनो
ग्निहोत्रादिकर्मचयनः एतदुक्तंभवति गार्हपत्यादिनिरग्निनिःसाध्यानिश्रौतानिका
मीलि अग्नयस्त्वाधानसाध्यास्तस्मादाधानप्रकृतिर्वसिद्धंश्रौतानांकर्मणांबहुव २
चनंसर्वश्रौतपरिग्रहार्थं सवीलिश्रौतान्याधानाद्ध्यनवकर्तव्यानिनकिंचिदपिश्रौ

तन्नाधानादर्वागिति अनेनप्रकारेणाधानस्यकर्मार्थत्वनिराकरणेनाग्मर्थत्वंसाधितंभव
ति तद्यदिकर्मार्थंस्यात्प्रतिकर्मक्रियेततत्रकस्यचित्परस्ताद्पिस्याद्यस्यपरस्तादाधा
नंस्याच्चस्याग्न्याधेयप्रकृतित्वंविरुन्ध्येत आधानस्याग्मर्थत्वेचनायंदोषः अतोबहुक्व
नेनाधानस्याग्मर्थत्वंसाधितंभवति तस्मादनाहिताग्नेःक्षामवत्पादयोनभवंतिअवा
कीलिपिन्वाद्यर्थंवाधानंनकर्तव्यंभवतिनपरस्तात् आहित्पेनेनसर्वमिदंशास्त्रंप्रकृति
मूलमितिदर्शयति तेनास्मिन्शास्त्रेयदृष्टमूलंतदाम्नायांतरमूलमितिसाधितंभवा
ति अस्मिंस्तुशास्त्रेअनिबद्धस्यस्वाम्नायेदृष्टमानस्यप्रकृतितएवप्रयोगसिद्धिर्भवति
प्रकृतेःस्वातंत्र्यसंकीर्तनादिति आधानस्यप्रथमानुष्ठेयत्वात्प्रथमंतदेववक्तव्यमित्य
तआरु दर्शतत्वात् दर्शपूर्णमासशब्दोयथासंख्येनस्त्रयविंशमसोरंतसंनिकृष्ट

विप्रकृष्टदेशस्थितिलक्षणवचनोतद्योगादहोरात्रवचनोतद्योगादेवकर्मवचनो अत्रतुक
र्मवचनोपक्वास्त्रयोऽवचनोपिदर्शशब्दोऽप्यावृत्तरत्वात्पूर्वंनिपात्यते तुशब्दोविशेषद्यो
तकः तंत्रमंगसंस्कृतिःविध्यंतइत्यर्थःस्वावस्थानादिःसंस्काजपांतःप्रधानस्यतंत्रेणांतं
त्रमित्युच्यते तच्चदर्शपूर्णमासयोरेवान्नातंनान्यास्विष्टिषुअतस्तत्सापेक्षत्वादन्यासांता
वेवपूर्वंमाख्यातव्योसातं एतउक्तंभवति आधानस्यप्रथमंप्रयोज्यत्वान्नस्मिन्नेवप्रथ
मंव्याख्यातव्येसतितत्साध्यस्यगार्हपत्यादेःपवमानेष्टिसापेक्षत्वान्नाऽपितत्रैववक्तव्या
स्युःउक्ताऽपिविध्यंतसापेक्षत्वान्नस्पचदर्शपूर्णमासयोरेवान्नातत्वान्नाख्यानमंत
रेणतज्ज्ञानाभावात्स्वयोक्तुंनैवशक्यंते अतोनैनविशेषेणतावेवपूर्वंव्याख्यास्यामोना
धानमितिसूत्रस्यार्थः इदानींदर्शपूर्णमासयोर्व्याख्यानमारभ्यते दर्शोनीताः दर्शपूर्ण

मासयोरित्यधिकारार्थंआधायपरिसमाप्तेःवाक्येनशेषिविशेषासंयुक्तस्योपयार्थत्वा
य हविरासादनमामंत्रणंचोपयंसंहृगतमेवैष्टिकस्यप्रवेशस्यनिमित्तंहोत्रमित्यादेव
स्यसमाख्या तद्धेदविहितानांपदार्थानांकर्तव्यतेत्युच्यते प्राङ्मुखत्वंस्थानावघनाभ्यां
संबध्यते मध्यगतस्यविशेषायरुणात् यज्ञोपवीतंतावदाचमनार्थतयानविधेयंस्मृति
प्राप्तत्वात् अन्यार्थंचननवतिसंबंधाभावात् एकवाक्यगतत्वात्कर्तासंबध्यमानस्यच
प्रयोजनाभावःस्मृतिप्राप्तत्वादेव अतःस्मृतिप्राप्तमिदन्यते स्मार्तानांस्नानाचमन
यज्ञोपवीतादीनांश्रौतकर्मविरुद्धानामस्मिन्शास्त्रेप्राप्तिप्रदर्शनार्थं इदमाचमनंकर्तृ
गंविधीयतेशौचार्थस्यगृहप्रवेशात्प्रागेवकृतत्वात् तऊर्ं मनःप्रसादात्सत्योत्कर्षात्पा
सायानकर्मणा आत्मांतरात्मनःशुद्धिंकृत्वाकर्मसमारंभेदिति दक्षिणाहन्नाभ्योद

क्षिणंपार्श्वमध्येक्रत्वावर्त्तेसदक्षिणाहृत्विङ्क्रियंतेऽनयोर्यस्मिन्देशेसविहारः उत्करोना
४ मउत्कीर्यतेवेदियांसवोयस्मिन्देशेसउत्करः ग्रणीतानामापोमंत्रसंस्कृताः आहवनीयस्यो
त्तरतोनिहिताः उत्करंग्रणीताश्चांतरेणयोदेशस्तेनविहारंग्रपद्यते एतदुक्तंभवति स्नात्वा
चम्पयज्ञोपवीतीभूत्वारुविःग्रासन्नेषुआमंत्रितश्चसन्होताग्रागुदगाहवनीयाद्योदेश
स्तस्मिन्ग्राङ्मुखोवरुत्रायनिःक्रम्यग्राङ्मुखएवभूत्वाचम्पदक्षिणाहङ्कृत्वाश्वेणोत्करमप
रेणग्रणीतायोदेशस्तेनविहारंग्रपद्यतइति उत्करग्रणीतायरुणादेवविहारग्रस्यार्थेसिद्धे
यद्विहारग्रहणंतत्सर्वाःकर्त्तासर्वकर्मणिविहारग्रपदंकुर्वन्दक्षिणाहङ्कृत्वैतेनयथा
ग्रपद्यतेत्येवमर्थं इध्मग्रणीते यदनौषधिरुविध्मंकर्मतदग्रणीतामिहोच्यते रुविःग्रपणा ४
र्थत्वात्ग्रणीतानांतस्मिन्इध्मनपरेणग्रपद्यते ग्रणीतातत्रनसंतीति चात्वालंवात्वालव

त्सुचात्वालोनामावटःपशुसोमादिषु स्तियेषुउत्तरवेद्यर्थंभूत्वात्क्रियतेतद्वत्सुतेषु
तमपरेणग्रपद्यते सर्वत्रोत्करःपश्चिमावधिः एतत्क्षते एतमध्वानंतीर्थमित्यावक्षतेवे
दविदः आवक्षतइतिब्रुवन्वैदिकीयंसंज्ञानपारिभाषिकीतिदर्शयति उत्कराग्रहणा
वेपिसदेशस्तीर्थसंज्ञएवदेशलक्षणार्थत्वादुत्करादीनांग्रहणस्येति अतोग्निहोत्रा
दिग्रपितेनैवपथाग्रपदंसिद्धंभवति तस्मिन्चेष्टाः षट्सूत्राणिसर्वार्थानितदर्थंता
स्येतिविशेषणंकृतं असत्यस्मिन्होतुःग्रकृतत्वात्तस्यैवेमेविधयःस्युःग्रस्मिंस्तु स
तिग्रसन्निकृष्टविषयत्वात्सर्वनाम्नस्तीर्थेनविहारग्रपदंनार्हेयः कर्त्तीविहितःत
स्यैवेमेविधयोभवंतीतितस्येतिविशेषणंकृतवानाचार्यः नित्याइत्यनेनग्राकरचेष्ट
तायाःनित्यत्वंरविधातव्यं विहितत्वादेवस्वरूपनित्यत्वयोरपिसिद्धत्वात् अतस्त

स्येषोर्थः तस्यब्राह्मानांचेष्टानामुपरमेपिमनोवाक्कायय॑त्रणादयोनित्याएवेति प्रापद्यते
शब्दःश्रूयतइतिवाचीपुंसिबजुक्वनांतःचेष्टाइतिक्रियावाचीस्त्रियांबजुक्वनांतःतत्र
प्रापद्यत्पत्रपुंसःप्राक्तेनसंबंधात्कर्तुःप्राप्तुरत्वंविधीयतेचेष्टाशब्दगतबजुक्वनेना
स्पबजुत्वस्यसामानाधिकरण्यादेवचेष्टानांप्राक्तंविधीयतेतासांजन्यत्वात्स्वतः
प्राक्कासंभवात्तत्साधनेषुप्रागयतातासांचप्राप्तेवापवर्गइतिएवंविधिर्बलाद्भवति
एतदुक्तंभवतियोयस्तीर्थेनिवहारंप्रपन्नस्तस्यतस्पाद्भिक्षमणान्मनोवाक्कायय॑
त्रणादयोनित्याःस्युःकर्तुश्चप्राप्तुरत्वंचेष्टानांचप्रागपवर्गतातत्साधनानांचप्राग
यतेतिविषमस्तत्रप्रणयनेनव्याख्यानतोविशेषप्रतिपत्तिर्नहिसंदेहादलक्षणमि॰ ५
त्येषापरिभाषासंगृहीतानभवति अंकधारणेव अंकमरूपस्थःतस्यकरणंदक्षि॰

एोत्तरिणोपस्थेनेतिवक्ष्यमाणरूपंधारणेत्फव्यतेसाचनित्यानवेदुपवेशनकालादा
रभ्याकर्मसमाप्तेरविच्छेदेनकार्यत्यर्थः अंकधारणस्योपवेशनांगत्वेनप्राप्तस्यादृष्टता
र्थतापरिहारायेवनित्यत्वेपिप्राप्तेतन्नित्यतावचनंनपत्नीसांयाजिकेऽनिरस्तरण
मित्येवमादिश्चपवेशनेषुमंत्रनिषेधेपिवक्ष्यमाणस्योपवेशनप्रकारस्यनित्यत्वेन
प्रापणार्थंमंत्रविध्यसंभवेग्रथग्निहोत्रादिषुवक्ष्यमाणलक्षणस्येवोपवेशनस्यप्रा
पणार्थंचयज्ञोपवीत्यरूपस्यस्मार्तस्यनांगप्राप्तेर्थत्वान्निवीतप्राची
नावीतयोर्मनुष्यपैत्रकयोःकर्मणोःस्मार्तत्वेनप्राप्तौसत्यांनियमार्थमिदमुच्यतेयत्रनि
वीतप्राचीनावीतंविधीयतेतत्रैवतेनमानुष्यपैत्रकंवाकर्मेदृष्टुतियोर्विध्यनावेयज्ञोपवी
तमेवेतिनियम्यते देशस्यांगप्रधानार्थत्वादिलादिनक्षणादेश्चांगत्वादस्यविहारदेश

प्राप्तौसत्यामेवंशौचयत्नेननियम्यतेक्रत्वर्थमधस्तुचित्वसंपादियत्तद्धिहरान्निक्रम्यब
हिःकर्त्तव्यंअंतर्विहरन्नुविरेवनित्यंस्यादिति विहरत्वेकर्म व्याहन्तिःदृष्टतःश्रुतिःनविह
रंष्टतःकुर्यान्नत्रवेद्विहरेकर्मकुर्वन्नवेतद्ययोगमध्येपिकर्मकुर्वतान्नेवायंनियमोनोप
रतकर्मणामित्यर्थः अतोविहरव्याहन्तिनिषेधात् पश्चादस्योपविश्यपश्चात्त्वस्यधिष्ण्य
स्योपविशति पश्चाउत्तरवेदेरुपविश्याध्वर्युरित्येवमादौमध्येरवायाअपक्रम्यउत्तरत
उपविशेत् चशब्दस्त्रिषुसूत्रेषुनित्यत्वानुकर्षणार्थः तत्रवेकर्मेतिवचनात्ब्रह्मणोप्य
यंनियमोनवेत् उत्तरसूत्रांगंवेदंपदत्रयंतेनब्रह्मणोदक्षिणांगव्यापारःसिद्धोभवति
एकांगतीयात् एकशब्दःकैवल्यवचनःएकंचतदंगंचैकांगंसव्यदक्षिणनेदेनद्वित्व। ६
योगियदंगंरुत्तादितस्यद्वित्वेनविनावचनेदक्षिणमेवांगंसाधनंविद्यात् द्वित्वयोगा।

द्धाम्नांकुर्यात् एकवचनबहुवचनेकैत्रैकित्वबहुत्वापेक्षेएकत्वादीनामन्यत्रोपयोगा
त्केवलांगवचनमेवदक्षिणप्रत्ययस्यनिमित्तमित्यर्थः हस्तेनवाग्न्यादेनेत्फदारुणं
अनादेशोद्वित्वयोगिनांगस्यानादेशोक्रियामात्रविधानइत्यर्थः तत्रापिदक्षिणंविधा
त्प्रपद्यतेअग्निक्रम्यअंगुलीरंगुलिनिरित्फदारुणानि चक्षुरादेरनंगत्वान्नेष्वयंनिय
मोनास्तिअवयवविशेषान्नयाहिरावयश्चक्षुरादयउच्यंते नावयवाइति कर्मतारं क
र्त्तारहितेक्रियाविधौहोतारंकर्त्तारंविधात्कर्त्तासहितेसएवकर्त्तानेवेत् येनसहितंत
त्कर्मस्यात्कर्त्तरहितोपिगुणविधिःसर्वार्थएवकर्मचोदनायामितिवशेषणात् नेदंहो
तुःश्रापकंकिंतर्हिश्रान्तस्यनियामकंतेनेष्टिपशुसोमेभ्योन्यत्रनहोतुरेवकर्त्तृत्वंनियम
इति ददानं स्वत्वव्याहन्तिपूर्वकंपरस्वत्वापादनपर्यंतेददातिविधौयजमानंकर्त्तारं

विधात् जुहोति ब्रह्माणं तृतीयाध्यायगोचरेऽयश्चित्रप्रकरणेजुहोतिजपतितत्रकर्त्तृ
रंब्रह्माणंविधात्जपशब्देनात्रसाहचर्य्याज्जपादिषड्ंगृह्यतेतस्मिन्प्रकरणेमुख्यस्पज ७
पस्यानावात् एवंचसतिकर्मकरणत्वेनहोममंत्रस्याविग्रहेसिद्धेयत् जुहोतिग्रहणं
तज्जपग्रहणेनहोममंत्रानगृह्यतइत्येवमर्थं तेनपि न्यायंजपादिलोपेपिहोममंत्रानां
लुप्यंते ऋचं ग्रहणे पादशब्देनमूलवावीऋचोमूलग्रहणेऋचंविधात्नांतमध्ययो
र्ग्रहणेधवोवाजाअग्निर्यवोग्निर्नर्तितावंसोमक्रतुभिरित्यादाहरणानि सूक्तं पादे अ
त्रपादशब्दोगायत्र्यादीनांनागवावी सूक्तादौहीनेपादेगृह्यमाणेसूक्तंविधात् त्वमग्ने
वसूत्वंहिक्षेतवदित्याद्युदाहरणानि अधि सर्वत्र अधिकेपादेगृह्यमाणेत्वंविधा ७
त्सर्वत्रसूक्तादावसूक्तादौचेत्पर्थः अथ आयाहिवीतयेगृणानइत्येनमस्तिरइ

त्याद्युदाहरणानि जपा पांशु सर्वत्रशब्देनापिसंबध्यते मध्यगतस्पविशेषाग्रहणात्प्र
योजनवत्वाच्च अस्मिंछास्त्रेयानिजपादीनितान्युपांशुग्रहोक्तानि मंत्रा रणाःचशा
ब्देनात्र सर्वत्रेत्यपांश्वितिवानुकृष्यते मंत्राःकर्मकरणाश्चसर्वत्रोपांशुग्रहो
क्ताः उपांशुत्वस्पेदंलक्षणंकरणवदशब्दममनःप्रयोगमुपांश्वितिजपादीनांषण्णां
लक्षणान्युच्यंते जपमुच्चारणंविद्याऋत्वर्थमपितन्नवेत् जर्थतःकार्यलाभश्चेदर्थएव
क्रतोर्नवेत् मंत्रमुच्चारयन्नेवमंत्रार्थत्वेनसंस्मरत् शेषिणंतन्मनान्त्वास्पादेतदनुमं
त्रणं एतदेवानिमंत्रस्यलक्षणंवीक्षणाधिकं अग्निःसंस्पर्शनाधिक्यान्नदेवाप्यायनं
स्मृतं उपस्थानंतदेवस्यात्प्रणतिस्थानसंयुतं बाह्यंकार्यंतदेतेषुमंत्रकालेक्रियेतत
त् कर्मणःकरणास्तेस्युर्विहितार्थप्रकाशनात् मंत्रेणकृत्वामंत्रांतेक्रियतेकर्मयेषुतु

इदंकार्यमनेनेतिनक्वचिद्दृश्यतेविधिः लिंगादेवेदमर्थंत्वयेषांतेमंत्रसंज्ञिताः अनुमंत्रण
ग्रहणेनाग्निमंत्रणंयहणमपिगृह्यते अनुमंत्रणाप्यायनोपस्थानानांकर्मकरणत्वाविशे
षेणियत्पृथग्ग्रहणंतन्मंत्रांतेकर्मारंभनिवृत्तिकर्मकरणधर्मीयःसतेषुनभवतीत्येवमर्थं
तेनमंत्रोच्चारणसमकालमेवांतेषुक्रियानवति यस्मं लीयान् सामान्यविधेर्विशेषविधि
र्बलीयानित्यर्थः लोकवेदप्रसिद्धस्यन्यायस्यवचनप्रयोजनंसर्वेपवादाःप्रसंगस्येव
बाधकानामपवादा सावकाशत्वेपरस्परंबाधकाइत्येवमर्थमतःस्वाङ्गिलीयासुआ
हवोन्नयोःप्रणवयोर्यैमिद्वस्तिगरौतयोःप्रणवरूपहस्तिगरौनबाधकौभवतः प्रपद्या
माणः तिष्ठेदितिशेषः तीर्थनविहारंप्रपद्यतइतिउक्तं तच्चैकेनपदविक्षेपेणबहिर्वि
हारादंतर्विहारप्रपदनंकर्तुमशक्यंदक्षिणंगप्रत्ययश्चसिद्धएव इदानींप्रपद्येत्क

व्यते आवेदिन्नाण्पायस्यप्रपदनंतस्यसर्वस्यविहितत्वसिध्यर्थं अनिद्ततरेणेतिनर
योर्वचनंअनेकपदविक्षेपसाध्यत्वादस्यप्रपदनस्यसर्वेष्वपदविक्षेपेषुदक्षिणस्या
यतोरुरणसिध्यर्थं वेदरपरान्नोः श्रोणिरितिसंज्ञा पूर्वान्नोरंसइतिपादस्यापरोभागः
पार्ष्णिःपूर्वः प्रपदःबहिर्वेद्यांस्तीर्णेतिरणउत्तरयान्नोण्पादक्षिणस्यपादस्यपार्ष्णी समां
निधायतस्मेवप्रपदनवेद्यांस्तीर्णबर्हिराक्रम्यबहिर्वेदिसव्यंनिधायात्मनःसव्यदक्षि
णोरुस्तोष्टथक्पृथक्विरलांगुलीकोकृत्वाधुनस्तथाभूतावेवतोपाणीपरस्पर
संहितौवकृत्वातौहृदयसंमितावंकसंमितौवाधारयन्यावाष्टथिव्योःसंधिमीक्ष
माणःनोर्ध्वमध स्तिर्यगवेक्षमाणऊर्ध्वःप्राञ्जुरवस्तिष्ठेत् एतद्धोतुःस्थानं अयंस्था
नशब्दोभावसाधनोनाधिकरणसाधनएतच्छब्दनश्रोणिदेशेनहस्तपादादियंत्रणेन

चविशिष्टंयत्पूर्वसूत्रोक्तंतदत्रस्थानशब्देनोच्यतइतिप्रदर्श्यते यत्रहोतुःस्थानंवोद्यते
तत्रैतत्स्थानंभवतीत्यर्थः होत्र्यरुणमुत्तरसूत्रस्थस्यसर्वार्थित्वाय आस नूतः अयंवाश
ब्दश्चशब्दार्थेवर्तते स्थानंवासनंवसर्वत्रसर्वैःकर्तृभिर्वंभूतःकुर्यात्सर्वेक्रियमाणपादादि
यंत्रणाविशिष्टेनआग्नीध्रादेशविशिष्टइत्यर्थः आग्नीध्रादिसर्वेषुयाज्ञेषुआग्नीध्रादेशवर्ज
नेनकर्त्रंशशरीरविशोषणानामेवयाजपणार्थमेवंभूतवचनं वचनादन्यत उक्तस्यान्यथाभा
वोयावन्मात्रस्यवचनंतावन्मात्रस्यैवनतत्संबंधिनोन्यस्यापीतितेनहोत्रादौक्रियमा
णेदक्षिणस्यपाणेरपाग्नेयेपिसव्योत्तद्यान्नापैतीतिसिद्धं वषिनोजपति अत्रान्यार्थ
स्यैषस्यानावात्सामिधेन्यर्थंवषिनोहोतानमःप्रवक्रइत्यादिहोत्रंजुषध्वमित्यंतंजपे
त् सामिधेन्यर्थंत्रैषोत्तरकालवर्तित्वादयंजपःसामिधेन्यर्थेभवति अत्रानुमितिश

ब्दस्यस्थानेद्वितीययाविभक्त्यास्वप्रातिपदिकनामनिर्द्दिशेत् स्वयंहोत्रादिनिधित्वेनप्रहृत्यास्या
पिजपकर्तुरेवनामनिर्द्दिष्टंनहोतुरितिन्याय्यतेअशंतिंवहेतिजपैकदेशमुच्चारय
न्गुल्यग्राण्यवकर्षेत् प्रयीतिवोच्चारयन्प्रतिसंदध्यात् तेनावकर्षसंधानेजपांगंतकु
र्वतोविधानात् समाप्नोहसमाप्येत्यनेननमःप्रवक्रइत्यादेःहोत्रंजुषध्वमित्यंतस्यैक
जपत्वंदर्शयतितेनांतरायत्कार्यंह्यग्नवकर्षणंसंधानंचतज्जपकर्तुःसंस्कारएवभ
वति नकार्यंतिरं अतःपित्र्यायंजपलोपेनकर्तव्यंभवति अग्नेःसमिधनाधीत्रचःसा
मिधेन्यस्तासन्वाहःअनुब्रूयादित्यर्थः ऊंशति यति हिंकारस्यनानारूपत्वादिष्टप्रा
प्तिग्रहार्थःपाठः एषोकारः जपसहितस्यहिंकारस्यानिहिंकारइतिसंज्ञाविधीयते न
हिंरोति एवंत्ववधारणान्नके वलंजुक्रममात्रंप्रणवरहितंचेतिदर्शयति आवा

र्यगृह्णंविकल्पार्थं नच पति कौत्सइतिशेषःश्वीमितिनमःघवक्रइत्यादिमित्यर्थः अथ
तिङ्ङे अथशब्दक्रवामेवसामिधे नित्वंदर्शयतिपूर्वंसामिधनीयगृह्णंसामिधेन्याद्यंगानां
मध्येप्रणिहिंकारःसामिधेन्यादीनामासन्नतरमंगमितिदर्शयति तेनवैश्वदेवशस्त्रेदिग्धा
नोत्तरकालमप्रणिहिंकारःकर्त्तव्यइतिगम्यते ताए- ऋयात् याएताउक्राक्रवस्ताएवम
नुक्र्यादित्यर्थः उदात्तमृंऐकश्रुत्यलक्षणमुच्यते उदात्तानुदात्तस्वरितानामप्रिव्यंज
कायेघयत्नाजायाप्रविश्रेनाक्षेपास्तेषामन्यतमस्यैकस्येवात्यंतःसन्निकर्षेणासजा
तीयघयत्नाव्यवधानेनयऊच्चारणंतदैकश्रुत्यमित्यर्थः स्वरा ततं इदंसंततलक्षा
णंस्वराध्यंगंतपदघोयोऽिघदेशेपलक्षणार्थत्वाद्गंतोयःस्वरादिःस्वरएवाकेव। ९०
लस्तमोंकारंत्रिमात्रंकृत्वातेनघणवेनोत्तरामृचंसंधायतस्याऊर्द्ध्वंविस्पेत्र मका।

रांतंत्रिमात्रमितिमुक्तमेणयोजनासमुदायस्यत्रिमात्रतायाइष्टत्वात् अतएवंभवति
ओंकारोऽर्द्धतृतीयमात्रःमकारोऽर्द्धमात्रइतित्रिमात्रत्वंघणवस्य उत्तरवचनमाहत्रिनो
नाहत्रिनश्चोत्तयथागृह्यते यस्यणवेनोत्तरसंधानमात्रंविधीयतेतत्संततमित्युच्यते
एत सानं सामिधेनीघन्त्यानामन्त्यामर्द्धर्चवसानस्यपूर्वसूत्रेणैवसिद्धत्वात्इदमव
सानविधानमाघायाम्रविघापणार्थं अमन्त्रंवजपादिष्वपीति उत्तमोहे अदानमारंभः
विघमोरुविन्नेषःपूर्वस्योच्छ्वासस्याविघमोरुएवोत्तरमुच्छ्वासमारभेतेत्यर्थः विघमो।
रुपूर्वमेवसम्यक्पुनःपुनर्ब्रूयादित्यर्थः अस्मिन्नेषइदमेवघायश्चित्तंनान्यदिति
सूत्रस्यघयोजनं समा सानं अर्थघाघस्यविधानंविहितएवायमर्थोनार्थघाघइत्ये।
वमर्थं चतु साने यदवसानंविहितमेवनार्थघाघंतस्मिन्नवसानेचतुर्मात्रःघणवोन

त्रिमात्रः तस्मांतापन्निः तस्मद्गणवस्ययोंतोमकारः तस्मवर्णांतरापत्तिर्वक्ष्यतइत्यर्थः स्प
११ र्शेतिमँ स्पर्शेभ्युरेभ्युयः स्पर्शोमकारात्परः तस्मस्ववर्गंपंउन्नमनापद्येतेमकारः सन्निध्यसो
ञ्जंमज्जयेत्तेत्यादिनिदर्शनं अंतः सिकां रेफस्यानुनासिकत्वासंभवाद्यवलाएवात्रांतस्था
गृह्यंते तासुयायापरांतस्थांतांतामनुनासिकांमकारआपद्यते तत्रसानुनासिकाश्चर्वा
उत्तराश्चुद्धाएवमंत्रसंयोगः विदधानिप्रवोदयोंवाजीवाजेष्विंतिनिदर्शनं रेफो स्वारं ए
तेषुमकारोनुस्वारमापद्यते अनुस्वारोनामनासिकास्थानोस्पृष्टकरणश्च अस्पय
ज्ञस्पसुक्रतोसमिध्यमानोअध्वरइत्यादि त्रिः य कारं अर्धर्धकारमध्यर्धीकृत्येत्यर्थः
प्रथमोन्नमेक्रचौत्रिरध्यर्धकारंब्रूयात् अध्य अथद्व प्रथमायामेवमध्यर्धकारंनवा ११
तिश्चमिध्यर्धमुत्कावसायततोद्वेक्रचौब्रूयात् द्वेशतिक्वनमर्धर्चचतुष्कानिषायंश्

वीस्मिंस्तत्रेनुच्छ्वासंप्रथमायामाहनौद्वावर्द्धर्चौद्वितीयायामेकश्चेतित्रयोर्धर्चउक्ताअस्मिं
स्तूच्छ्वासेद्वितीयतृतीययोराहनोस्त्रयोर्द्धर्चोउत्तरस्मात्रचएकोर्द्धर्चश्चेत्वत्वारोर्द्धर्चि
वक्रव्यानवेयुः अध्यर्द्धकारविधेःउत्तरयासंधानाविरोधादिति अथशब्दोस्पस्तत्रसा
म्यार्थत्वप्रतिभासनिहस्पर्थः द्वेप्र ध्यर्धर्चयासंधानाविरोधात्उत्तमायामेवंभवति
अथशब्दश्चपूर्ववत् तांपं स्तानिः एकादशानाम्स्वांद्योस्त्रिरभ्यासेकृतेता अभ्यस्ता
निःसप्तपंचदशैवभवंतीत्यर्थः प्राप्तएवायमर्थः अस्पक्वनस्येदंघयोजनंसर्वत्राभ्य
स्तानिःसहविहितसंख्याश्चरणंकर्त्तव्यमिति एतेन नानि शंसत्यादिशब्दोदितानिशा
स्त्रादीनिभवंति एतेनेतिसामिधेन्यनुक्वचनमुच्यते शस्त्रादीन्यितत्रविहितानितेषां
धर्मापेक्षास्तितत्रैतेनतानीत्यकृतेएतद्धर्मकालितानीतिगम्यते अनेनप्रकारेणतेषां

सामिधेनीधर्मानिदेशऽऋोनवति सर्वधर्मघाम्नोकतिपयधर्मनिषेधार्थमारु नत्व का
१२ रं नज रात् नाम्नि कृत्वा अन्यत्रेत्येतावदनुवर्ततेतस्यसामिधेनीम्योन्यत्रेत्ययमर्थः अ
तःपित्र्यायामन्निहिंकारःसिद्धोनवति अभ्यासनिर्हृत्यर्थंतत्रैवतायरुणंकरिष्यति तेना
भ्यासोननवति प्रकृत्येतिशब्दोभ्यासेनबऊधपिपुरीष्यासोजगत्यश्त्येवमादिषुतयोर
नावेदश्यिति नाव दादो अवच्छेदोनामयत्रशास्त्रादिषुप्रध्वेसमाप्यावस्पेदित्येवमादि
निःशब्दैरवसानंविहितंसमाप्यप्रणवेनेत्येवमादिषुसोवच्छेदः तत्रापितोनस्तः शास्त्र ।
कारः अस्मिंछास्त्रेमुख्यवर्जिताद्वादशत्रिजोरुत्रकाश्स्फुर्यंते नसप्तवात्रयोवातेना
यावस्कृतोन्निहिंकारनिषेधःसिद्धोनवति सामि तस्युः प्रणवेननिगदंसंधायनिगदे १२
वस्पेदित्यर्थः तत्रवसायार्षयान्प्रहणीतियावंतोयजमानस्पतेनवंतितेचप्रवराम्ना

तृभमं१

येव्याख्याताः परं थमं अस्पेमआर्षेयाश्यंपरः अयमपरश्त्येवमादिस्मृत्यनुसारेणप्र
वराम्नायएववरणप्रकारःपण्डितःसएवइदानीमियंतोवरीतव्याश्लंवरीतव्याश्तिविधा
नमन्यक्षेत्रजातघ्यामुष्यायणार्थं पौरोविशां पुरोहितस्पयआर्षेयास्तानेवराजन्यवै।
श्ययोःप्रहणीते बऊवचनंत्रैवलिकिस्त्रीजातानामनुलोमानांसंग्रहार्थं राज राज्ञो मानवे
नपौरूरवसेसेवंवापौरोहित्यान्वा सर्वे शये अज्ञानेसंशयेचत्रयाणांवर्णानांमानवेत
यंशब्दःप्रवरोनवेत् देवे वयत् निगदेवसायेतिनिगदश्तिसप्तमीनिर्द्देशात्सर्वापरीन्त्र
तोनिगदोनपरिसमाप्तश्तिगम्यते अतःप्रवरोपितस्पैवशेषः क्वचिन्मंत्राम्नायेभारत।
शब्दानंतरमसावसावितिप्रवरप्रकृतेःपठितत्वाच्चसंबुद्धिसामानाधिकरण्याच्च देवऋ
श्तिनिवित्पदनिगदःचतुर्दशनिवित्पदानिपरिन्नरसीत्येवमंतानि अवरुदेवान्पज

मानायेत्यादिः सुयजायजेत्यंतआवाहननिगदः सामिधेन्यादयएतेमंत्राआहवनीया
१२ न्निधायिनः तत्रभारतेत्यवस्येतरयवरांतेच निवित्पदानामेकादशेचचतुर्दशेनावाहन
निगदंसंधाययजमानायेत्यवस्येत घृतिपद्यावसायेत्यध्वरात घृतिपद्येतिवचनम
स्यवाक्यस्यघृतिपत्तिसंज्ञाकरणार्थंतेनपित्र्यायांघृतिपत्यंतरविधानएतन्नभवति त
त्रस्थित्वादेवतावक्षपाणाद्वितीययाविनक्त्यादिश्यादिश्यानंतरमावहेत्यावाहयति
आवहशब्दस्यादिंश्रावयन्द्वितीयाविधानंसर्वार्थंअत्रयाठादेवद्वितीयासिद्धेतिते
नदेवतामादिश्यघृणुयाद्यजेत्वेत्यत्रद्वितीयैवभवति विनक्त्यंतरविधानेतुतदेवभा
वति आवहदेवान् होत्रायावहवरु जातवेदश्चेतेषुत्रिषुस्रुतावसानेनस्तः अग्न १३
वतां यथमदेवतायामयंविशेषः तुशब्देनयष्टव्यदेवतावाहशब्दयोर्मध्येनेशब्दः

यात् अग्निं नागो यागयोरियमाख्यातत्संबंधादेवतयोरपीति अग्निं मास्या विशेषान्नावा
स्तोमयाजिनोऽस्तोमयाजिनश्चप्रधानदेवतेएते अग्नीयतः पौर्णमास्याः यथमाम्नानात्से
वंयथमप्रयोजना स्थानशब्दे पौर्णमास्या धर्मीणांयथमसंबंधंदर्शयति घान्नावविशेषेपि
योगावस्थायांविशेषयहणादिति तेनेदंबोधितंभवति असमाम्नातानामसतिबोदना
लिंगविशेषेपौर्णमासमेवतंत्रमिति दधिपयोम्यांयागंकुर्वन्नयत्रित्यच्यते योनसन्न
यतित्स्पंघाग्नीद्वितीया इंद्रंयतः सन्नयतोमावास्यायामिंद्रंमहेंद्रंवाअग्नीषोमस्थानो
आवाहयेत् अंतर्यिणः ऐंतरेयिणःशाखाविशेषाध्यायिनः तेएतमुपांशुयाजमुन्नयो
१ रपिपर्वणोःअंतरौविषीश्छंति अग्नीषोमीयंपौर्णमास्यांवेष्णवममावास्यामेकेनैकेकं
चन उन्नयोरपिपर्वणोः कंचनउपांशुयाजनंकेनेछंति अन्ये त्यच्चैः अन्येषामपीतिपित्र्या

दीनामंगोपांश्रनांसंग्रहार्थंआवाहनादिषुचतुर्षुनिगदेषुयान्फपंशुयाजसंबंधीनि
१४ षट्पदान्यावहादीनितेषामुच्चैरितिसंज्ञामात्रंविधीयते तंत्रस्वराण्युपांशोरुच्चानीत्यने
नसर्वेषामुच्चसंज्ञानांतंत्रस्वरौविधीयते येनपे त्रैवा येनश्रुतिसर्वनाम्नः सन्निहितविषा
यत्वात्तेष्वेवनिगदेष्वितिगम्यते तद्वचनाउपांशुयाजवचनाः परोक्षास्तेयेषांपदांतरस
न्निधानादेवविशेषनिष्ठतावसीयतेनस्वतः अजुषतादयः क्रियावचनाश्चस्पर्धः तेषा
मुपांशुत्वंघासमन्वयते उच्चैःसंज्ञाविकल्पेनविधीयते यत्पमुपांशु यागंघस्तिवोदितंदे
वतानामधेयंघत्पक्षान्निष्फच्यते तस्यघासमुपांशुत्वंनियमार्थंविधीयतेतस्यचोपांशु
त्वंनवेत् उपांशुदेवतायाःघाथम्येपिघथमदेवतायाःसंबंधियोग्निश्चआवाहनस्वि १४
ष्टकृन्निगदयोर्नतस्यापीति अत्रकिंविद्यते उपांशुयष्टव्यमितिवचनाउपांशुत्वं

यागधर्मतयावगम्यमानंतत्रासंभवादनर्थक्यतदंगन्यायेनतत्संबंधिनःशब्दान्परि
गृह्यतिष्ठति तत्रावहादीनामागुरादीनांवहोतायक्षदित्यस्यचोपांशुत्वंनिवर्त्यतंत्रस्व
रेनुज्ञातः परोक्षाणामजुषतादीनांविकल्पेनतंत्रस्वरेनुज्ञातः यत्पक्षस्यविस्वादेरा
वहादीनांचोपांशुत्वंनियमादस्यसर्वस्यतंत्रस्वरेप्राप्तेयाज्यानुवाक्ययोरागुरादिनिः
श्वासंतानविधानाउपांशुत्वमेवस्थितं घ्रति रुनं चोदनांचोदनांघतिघतिचोदनं चो
दनादेवतायाश्चोदनास्तावंसावाहनानिन्नानीत्यर्थः यत्पावाहनमुच्छ्वासनिःश्वासयो
ध्यर्थंनेदसाधनं सर्वदानां यत्रबज्झन्निर्हविर्निरेकयायाज्यायाबद्धोमोदेवताश्चेयु
गपद्यागाःक्रियंते तएकप्रदानायागाः तत्संबंधाद्देवताअप्येकप्रदानाइत्यच्यंते स
र्वइतिवचनंसर्वसिंद्धयर्थमादेशार्थंआदिश्यवचनंसर्वआदिश्यंत आवहशब्दघयो

गार्थं सकृद्वचनमंतेपिसकृदेववक्तव्योनयावद्देवतमित्येवमर्थं तथो क्तयात् एका
१५ग्नियेत्यिक्वनंयथैकस्यादेवतायाःपुरस्तात्स्वाहयाद्दशद्दोजजुष तादयश्चैकवच-
नेनतथेतास्वपीति समानं नाथो निगमेष्वेकाग्निवसंक्तयादित्यत्रापिसंबध्यते विशेषा
ग्रहणात् प्रयोजनत्वात् संप्रदायाच्च समानाग्नियेकाद्दाग्नित्यर्थः समानार्थाग्नि
येकप्रयोजनाग्नित्यर्थः अन्यमेषु अव्यवहितांअन्यादेवतयानिगमेषुसकृद्धूया
त्एकवचनेनैव ओल्हास्वा हन्मीति आवापिकाआवापोद्धारयोग्याःप्रधानदेवताद्द-
त्यर्थः तासुकृतावाहनासुदेवानाज्यपानावाहयेत् स्विष्टकृत्वं पाठानुनासिकलोपा
यनकारलोपायत्व होत्रायावहशब्दयोःस्विष्टकृदावाहनप्रयोगायत्व किंचपठितावा १५
हनानांपाठदेवोत्तरेष्वपिनिगमेषुनिगमनसिद्धिर्लक्ष्यतइत्येवमर्थं आज्यपाःप्रया

जानुयाजदेवताअग्निहोत्रायावहत्वंप्रधानमावहेत्येतावत्स्विष्टकृदावाहनार्थं आव
हजातवेदइत्यादिसुयजायजइत्संतोनिगदशेषः आवाप्यक्वनंसुयजायजइत्संतस्पआ
वाहननिगदत्वाय सामिधेन्यर्थंयथास्थितस्तथोर्ध्वजानुरुपविश्पउदग्वा स्रुवेद्यास्ती-
र्णानित्तणानिवेद्यान्नौपादेशंकुर्यादितिमीतेतिमंत्रेण आग्ना येति यह यशति मा
नुष उन्निष्ठेत् अध्वर्युर्यहणमुन्नरार्थं षष्टिः एतीत्कच्छाय ऋयादितिशेषः नायमुत्था-
नमंत्रः पूर्वैरेवनिरपेक्षत्वात् अतईदृशोमंत्रोमंत्रसंज्ञकः ऋतस्पंथा लिना अत्राध्व
र्युर्यहणेनप्रयोजनमनिरूपणान्वारंभणेअध्वर्योरेवकुर्यान्नप्रतिप्रस्थातुरित्येतत् ज
ह्वाद्भ्योःसंधिरंसस्तस्मिन्देशेध्वर्युमन्वारभ्यतेपार्श्वस्थेनपाणिनापार्श्वेनतिष्ठतीतिपा-
र्श्वस्थः कनिष्ठिकाप्रदेशेनस्थितः नम्यक्नोन्नानइत्यर्थः तेनान्वारभ्यताध्वर्यु आग्नी

नवा सव्येनपाणिनापार्श्वस्थेनांसएवंकदेशेनऊरुणावा इंद्रमन्वारभा दिवमिति उभयोः
१६ साधारणोमंत्रः अतोनावर्त्तनेनोच्यतेव संमार्ष्टिएवस्त्रिरभ्यात्मंमुखंसंमृजीत संमा ह्वीति
इध्मसन्नहनानिसंमार्गशब्देनोच्यंते अग्निसंमार्जनसाधनत्वात्तेषांतैस्त्रिरभ्यात्मंमुखंसंमृ
जीत तत्रैरितिवचनाद्दर्भैरवत्तैःसंमृजीतनग्रंथिभ्रंशैः पाप्मभ्रंशैर्वेतिगम्यते अभ्यात्ममा
त्मन्निमुखपाणितलमवागपवर्गंचसंमार्जनमिति सकृच्छी सर्वत्र इत्तौ सकृन्मंत्रेणद्विस्त्री
मित्येतत्सर्वत्रनवत्येवंधकारस्यकर्मणश्चाश्रुतौसत्यामिति एवंप्रकारशब्देनसंस्कारकर्मत
मुच्यते एतदुक्तंभवति यत्रसंस्कारकर्मणस्त्रिराहृत्तिर्विधीयते तत्रसकृन्मंत्रेणद्विस्त्री
मिति नघधानकर्मणि स्रुष्टौ पाकतरश्रुति होत्रर्षदनंजपरेणछित्वाघाज्यस्रुवान्निमंत्रयेत १६
उदकस्पर्शनंपूर्वंगंजग्निसंमार्जनस्तरोरात्मनोमुखसंमार्जनात्आत्मनोयदोष्यंतच्छो

त्यर्थत्वेनास्यदृष्टार्थत्वंभवति अंगु वसुरितिश्रुतम स्तेन दक्षिणंचतऊत्तरंदक्षिणोत्त
रं तद्वानुपस्तोदक्षिणोत्तरीतेनोपविशेत् एतेनि माने एतेश्रुतिप्रकारमंत्रविशिष्टयोर्ग्र
हणार्थं तेवसर्वेषांसर्वसिनेषुप्रथमोपवेशनेभवतः नद्वितीयादिप्रयोगश्रुत्येकोर्थः समा
नेथासनेअहर्गणेध्वरुरुः प्रथमोपवेशनेभवतः अयमपरोर्थः समानेपिस्थानेप्रयोगा
द्भौसुनःपुनरावर्त्तनेति प्रवर्ग्यादिष्वयंवापरोपिशब्दाच्छ्रूयते अस्यविधेर्दर्शपूर्णमास
प्रकरणेपठितत्वान्नदर्शदृष्टेष्वेवेष्टिपशुसोमेषुभवतोनाग्निहो त्रादिष्विति अंकधारेण
भवत्येव द्विरितिगौतमः अस्यावार्यस्यद्विःद्वितीयेपिप्रयोगेभवतिश्रुत्यनिधायः ४
ब्रह्मौद ब्रह्मा द्विरित्यनुवर्त्तनेक्रियमाणस्यकर्मणःदक्षिणतउपविष्टःसन्पुनःघो
नकालेद्वितीयेनिरसनोपवेशनेकुर्यात् अस्माधेयेब्रह्मौदनेद्वितीयविधानसामर्थ्या

देवश्चिप्यन्सोमेप्योन्यत्राधिब्रह्मणोनिरसनोपवेशनप्राप्तिरितिगम्यते अग्न्याधेय
ग्रहणमश्वमेधेयब्रह्मोदनंतत्रनैवंकर्तव्यमिति वह्निः सोमे आहवनीयस्यदक्षिण १७
उपविष्टःसन्हविष्यवमानंगत्वातत्रःप्रत्येत्यश्वसिनेषुनःकुर्यात् सोमग्रहणंसर्वेषुसो
मेषुप्राप्तंतदर्थइतरथा धानाधिकारात्तत्संबंधएवसोमेस्यान्नसर्वसोमेष्विति प्रसं
ग्येताः पञ्चर्थमुपविष्टएवासनेसदःप्रसर्पणंकृत्वातत्रैवपुनःकुर्यात् होत्रग्रहणंत्र
ह्माधिकारनिवृत्यर्थं स्रुगा पशौ स्वाहाकृत्यर्थेस्रुगादापनेपुनःकुर्यात् नप जिके प
त्नीसंयाजार्थेउपवेशनेनैवकुर्यात् नान्य कौत्सः होतुरन्येषामेतन्नवतश्रुतिकौत्सो
मन्यते उप यमिति उपविश्यानंतरंब्रूयादित्यर्थः अग्निं नवेति जानु जपेत् जानुशि १७
रोजान्वग्यंजतऊर्ध्वंग्रहणमुपस्पृशतोनजपःस्यादिति तेनान्यत्रैवंरूपेशब्देऽसति

कुर्वन्नेवकुर्यादितिगम्यते अरणीसंस्पृशमंधयेदित्यादिषु नृपतये निगदेन समा
प्यप्रदीप्तेइत्फनयस्यस्रुगादापनावसरप्रदर्शनार्थत्वाज्जपसमाप्तिरपिप्रदीप्तएवेति
गम्यते अनेननिगदेनआदापयेदध्वर्युअग्निर्होत्रावे जपेन्न अवसायेतिवचंनिग
दमध्येउच्छ्वासलाभार्थं जपेदितिनिगदमध्येउपांशुत्वलाभाय अथस यानिति अ
येतिवचनमत्रापुच्छ्वासलाभार्थंसमाप्तिवचनमग्निर्हेतित्यादेर्यज्ञियानित्यंतस्यएक
निगदत्वसूचनार्थं समा यति अध्वर्युकर्मविधानंप्रत्याश्रावणस्येदंनिमित्तमितिज्ञा
पनार्थंसमाप्तिवचनमाश्रावणेकृतेपिसमाप्तएवनिगदेप्रत्याश्रावणंकुर्यादित्येवम
र्थं प्रत्या नकंय शाद्यायनकयरूणंविकल्पार्थं अतःप्राङ्मुखत्वमपिलभ्यते अस्त

श्रावयत श्रुतंकुर्वन्नित्यर्थः ४ यया रंति वक्ष्माणलक्षणयागाः यया जाइत्फच्यंते तै
१८ श्चरंतियजंतीत्यर्थः पंचैवेति पंचवचनंनराशंसः तन्नूनपाद्ह्याप्रुष्पायणस्यापिपंचैव
भवंति नषलित्येवमर्थं एतच्छ्रुतिवचनं पठिताएवैतेतन्नूनपान्नराशंसयोरन्यतरेणस
हपंचभवंति नापठितेनसहेत्येवमर्थं

एकै जति नसक्कत्वे षितःस
वन्यिजति आग्र वर्ज्जं सर्वत्रसर्वसामनुयाजादिवर्जितानांयाज्यानामादावाग्नी
वति कोयमाग्नरित्याह येय त्याग्नः वषट् सर्वत्र अनुयाजानामपीतिसर्वत्रवचनं १८
ज्ञेः पायाः अत्रोच्चैस्त्वमतिश्रायोबलीयस्त्वव्यक्तरोच्चारणमेतउभयंयाज्या

याएव तयो वयेत् तयोरग्र्वषट् कारयोराद्योः स्तुतिःकार्या याज्यांतंच श्रावयेदिति
शेषःविक्ष्य तोवा नचेत्यग्रहणतिपतिवयेन्वेदेवनइतिघ्रादपाठः ऋगंतेया
निघ्रहणेणिसंध्यक्षरालितानिविक्ष्याकारमेवश्रावयेदितिएकारैकारयोः आइ
इति ओकारौकारयोः आउइत्येवंविक्ष्यस्तुतिःकार्या न्येष्ठ्यमंत्रोविष्ण्वचर्षणाऽइ
वौषडित्यादिदृष्टांतः एकारस्यघ्रहणस्यैस्वरूपेणैवस्तुतिः कार्या ओकारस्यघ्रहण
संज्ञायाअनित्यत्वान्नित्यौत्यसंयोगविरोधान्नस्यसर्वदापिविक्ष्यश्रावनंकर्त्तव्यं यो
जनांतानांसंध्यक्षराणांसर्वदास्वरूपेणैवस्तुतिःकार्यानविवेकःकर्त्तव्यः अधिग्नि
यंशुक्रमिशंदधाने वौषडित्यादिदृष्टांतः विसः क्षते अनत्यक्षरोपधःअनवर्लोप

धइत्यर्थः सवषङ्कारेणसंधीयमानोरिष्यते पिबासोममग्नियमित्यादिनिदर्शनं इतर
१९ ऋरेफो इतरअवर्णोपधः सवरेफिसंज्ञःवेत्ररिष्यते महोपावर्ज्जमितरोयथोक्तमि-
त्यत्ररेफिसंज्ञाधिगंतव्या उतत्वंवसंनवमित्यादिनिदर्शनं लुप्यतेरेफो अवर्णोपधो
योविसर्ज्जनीयःरेफिसंज्ञश्चनभवति सलुप्यतएववषङ्कारसंधौ अर्वाङेहिसोमकाम-
मित्यादिनिदर्शनं प्रथम स्तृतीयं वर्गाणांयोयःप्रथमःससःस्तृतीयमापद्यते नित्यं
मकारे जंतस्तासुतांतामित्यनेनोक्तमित्यर्थः येय वषङ्कारः वोषट्वषट्कारइत्यर्थः
इतिप्रथमः अयंप्रथमःप्रयाजइत्यर्थः वागो यते सर्वस्मायंविधिःस्यादित्येवमर्थीवी १९
प्सा दिवा कारः इथाराङ्नोनप्रयोक्तव्यइत्यर्थः किंचवषङ्कारसंबंधियत्कर्मतद्धिधं

तराविरोधेसतिदिवैवकर्तव्यमिति तथानुमंत्रणं दिवाकीर्तिमित्यर्थः तच्चोक्तार्थमेव एतद्या
दर्शनं यदिदंयाज्यायाःपुरस्तादाग्नःतस्माच्चादोयाज्यांतेश्रुतिःस्यात्उपरिष्टच्चवष
ट्कारस्तस्यचादौश्रुतिस्ततोनुमंत्रणं इत्येतद्याज्यास्वरूपनिदर्शनं अनुमंत्रणस्यया-
ज्यांतर्नविवक्षनंतदंतंवाग्यमनार्थं तत्र त्रेम्यः वसिष्ठादित्रिभ्योमध्यमद्वितीयः नरा ते
षां वसिष्ठादीनामयंद्वितीयः स्तृतीयः सर्वेषामितिविशेषः बर्हिः तुर्थः आग्नेयं
त्रिनि पंचमेएवंकृत्वातेनैवयजेदितिशेषः आगुरोविधानंक्रमार्थंचितिदेवतंत्वाहा
शब्दाभ्यासार्थंवीप्सावचनं यथावाहितायस्तानिम्नाज
पियरूपार्थं अनावाहिताइत्यनेनयथास्तानिम्नोपिदेवताःप्रमादादनावाहिता
स्तुस्तासामथत्रयथावोदितेक्रमेनिगमार्थंप्रयाजाद्यन्त्याजांतेत्यादिश्रुतयथावो

दितंतदीयानांदेवतानांनिगमनार्थंच इदमेवषट्कारद्वयमनावाहितयरुणात्रयस्त्रेतेना
न्यथा यथावाहितयरुणेनपठितावरुनानगस्त्रंतेतासांपाठादेवनिगमनंनान्यथत्फलं
स्वाहादेवाइतिशेषः यथासूत्रंमंत्रशेषः आतोमंडेण इतःपूर्वंयत्रमंडेणयोक्तं
अत्रपूर्वविधेरनावादन्यत्रैतत्सर्वमग्निमंथनादियज्ञवतितदपिमंडेणयोक्तमि
तिगम्यते त्रीणिवाचःस्थानानिमंद्रमध्यमोत्तमसंज्ञकानितेषुवसमसमयमानवं।
ति यमानामवस्थाःतत्रसमनेनयमेनवषट्कारःप्रयोक्तव्यः ततएकावरोहेणयाज्या
एवंसर्वत्रएकैकयमावरोहेणवषट्कारःप्रयोक्तव्यः ऊर्ध्व०वाकात्०मंडेणप्रयोक्त।
व्यं मध्यकृतः सर्वत्राकारोनिविधावेवात्रत्वनिविधोमर्यादायांबान्नवत्यध्वर्युवशात् २०
अत्रस्विष्टकृत्मध्यमेनोत्तमेनवाअध्वर्युवशात्प्रयोक्तव्यं प्रयाजेभ्यऊर्ध्वमास्विष्ट

कृतोमध्यमेनप्रयोक्तव्यं रुविर्यरुणंस्थानांतरेविप्रधानरुविषांमध्यमेस्वरएवेति उत्त शे
षः इलादिःस्विष्टकृदादिर्वाशंयुवाकांतः शेषइत्यन्ते सउत्तमेनप्रयोज्यः अग्नि वाक्या
त्वंसोरस्य जुषा रस्य तावा जति तावित्याज्यभागसंप्रत्ययार्थं आग्नेयंतिदेवतादेशस्यक्र
मविधानार्थंयजतीतिदेवता देशस्यायाज्ययासंधानार्थंतावाज्यभाग
संज्ञकौयागावाग्नेयानंतरंद्वितीययाविनक्त्यादेवतामादिश्यादिश्ययाज्ययासंधाययज
तीत्यर्थः सर्वा यास्याज्यः याअन्वायातशब्देनानुनिर्वापशब्देनवाचोदिताःताअन्वाया
त्याः तान्योन्यायादेवताअनुवाक्यावत्योयैषाञ्चताःसर्वाआदिश्ययष्टव्याः अन्वायासा
नामनुवाक्यारहितानांसयैषाएंगत्वादेशोनकर्त्तव्यइत्यर्थः सर्वयरुणमाज्यभागयोरपि
संप्रेषयोरादेशनिघ्नत्यर्थो सौमिकीभ्यश्चयाअंतरेणवैश्वानरीयंपत्नीसंयाजांश्च सौ।

प्रिक्यः सोमेन त्यन्नाः नसोमेघयोज्याऽपित्रोत्पन्नानामेवतत्रनवत्वसंभवात् वैश्वान
२१ रीयपत्नीसंयाजानंतरंहूयेदितानामेवयरुणंयुक्तं अतएतस्मिन्नेवासनेवैश्वानरी
यस्ययजतिइत्येतदेवगृह्यतेपत्नीसंयाजैश्चरित्वावभृथंव्रजंतीति एतएवपत्नीसंया
जागृह्यंतेअन्याश्त्यनुवर्त्तनेअंगप्रधानरूपेसोमकर्मणियौतौवैश्वानरीयपत्नीसंयाज
शास्त्रोदितौपदार्थौतियोर्मध्येयास्तत्रैवोत्पन्नादेवतास्ताभ्योप्यन्यादेवताआदिश्यएष्टव्याः
नताआदिश्ययष्टव्याइत्यर्थः एतौ मासौ यावेतौपौर्णमास्यामाज्यभागौतौवार्त्रघ्नसं
ज्ञौभवतइत्यर्थः सनिमित्तेयंसंज्ञेत्यरु अनुवाक्यापत्वं ततोविचारः अनुवाक्यातएव
विचारावगम्योन्यत्वमित्यर्थः नित्ये याजे उक्तेएवैतेसर्वत्रयाज्यानानुवाक्यावदेतयो २१
रन्यत्वमित्यर्थः इध स्यायां अग्निः यमिति आतोवाप्यमनं आदितंआरभ्याज्यभाग

पर्यंतंवाग्यमनंभवति अंत वाक्ये निगदा माप्तेः अत्रानिष्ठवनसंस्तवनशस्त्रेतिसंस्त
वनशब्दःपठितव्यः आरभ्येतिक्वचिन्मंत्रपठितस्या ज्यादिमस्तदारभ्यासमाप्तेर्वाग्यम
नसिद्ध्यर्थं हेतुरधिकारात्कर्त्रंतरस्यापिविधापणार्थंचेति अन्यद्यज्ञस्यसाधनात् यज्ञ
साधनत्वंसोमत्रवाग्यमनंनियम्यते यज्ञसाधनत्वोनामक्रियज्ञसंपादनार्थंत्रि
षयत्वंतरार्थंवि आप जयेत् आपद्येतिनियमप्रतिक्रम्येत्यर्थः अपिवाग्यो[illegible]
मापपीतिक्वनंश्रवैक्तायाअपिवैष्णवीत्वघतिपत्यर्थं उक्तादेवता रिति उक्तसंकीर्त
नंदेवताविधिक्रमस्मरणार्थंतासांयाज्यानुवाक्यावरूपमाणलिंगक्रमाभ्योयोजनीयाइ
ति इदमपिउक्तसंकीर्तनस्यप्रयोजनं यत्रदेवताविधायदेवतानंतरमृचोविधीयंते
तत्रतासांदेवतानांताएवयाज्यानुवाक्याइतिसार्वत्रिकोयंविधिरितितज्ज्ञापयितुं

अयमग्निरितिगायत्र्यपियाज्यानंतरमुक्त्वाद्याज्यैवनवतिसानुगायत्रीसामान्यादाधा
२२ नएवनवति यद्यग्नीषोमीयइतिस्रुक्रंपांतेपठन्असंशयार्थमुक्तवानाचार्यः अथस्वि
वाक्या अथशब्दःप्रधानानंतरंस्विष्टकृतोयागःस्यान्नावाहनक्रमेणेति अनुवाक्याव
चनंसर्वत्रपूर्वमनुवाक्यापश्चाद्याजेतिदर्शनार्थंयेयजा संतनुयात् आग्रविधानंमि
गदाप्रवेवस्यान्नक्रगादाविति अग्निंस्विष्टकृतमितिक्वनमग्निंहोत्रायशब्देनादेशोन
स्यादिति षष्ठीविधानंद्वितीयायानिवृत्त्यर्थं देवतामादिश्यक्रियाधामानिशब्दमुपसं
तनुयात् अयाड्शब्दः पूर्वपवितएवोत्तरेणस्त्रेणतस्यास्तस्यादेवतायाःपुरस्ताद
तिदेशरूपेणविधीयते देवतायाउपरिष्टाद्विधीयमानेनक्रियाधामानिशब्देनसंधा २२
मान्यथालिंतिसंततंपठितं अतोयतिदेवतमेकएवायाड्शब्द

१ नार्थंक्रियाधा

यथोक्तमेनद्वितीयइतिस्थितं एवमुत्तराः अयाल्लक्षात् उत्तरासामयंविशेषः अयाड्
शब्दएव तासांपुरस्तात्वयोजोनाग्निशब्दोपीतिएतउक्तंभवति प्रथमदेवतायाःपुरस्ता
दयाल्लग्निशब्दउत्तरासामयाड्शब्दएव सर्वासामुपरिष्टात्क्रियाधामानिशब्दः सर्वत्र
संततावक्तव्याइति आज्यपां यजतीति आज्यपांतमितिषसिद्धक्रमसंग्रहादावाहनक्र
मोत्रापिपरिगृह्यते तेनास्त्वानिन्द्रागमनमिहापिस्यात् आज्यपांतमेवमुत्क्रातदनं
तरेणक्रियाधामानिशब्देनयक्षदितिसंधायथासूत्रमुत्क्रामुषतांरुद्रिरमेयद्युत्स्त्व
वानुह्वसन्यजेत् सर्वत्रानुह्वासःकर्तव्योस्यायाजायां यक्रुसावा अङ्क्ष्वेवोह्वसेत् प्र
देशिमार्ष्टि प्रदेशिनीनामांगुलिविशेषः पर्वणीसंधी उन्नमेदित्यतोद्वेपर्वणीइत्यर्थः
अध्वर्युणातेपर्वणीअंजयित्वाअन्यात्मानंपाणितलंकृत्वाओष्ठ्योरपवर्गनिर्मार्ष्टि

वावस्पंधरे अनेनैकैकस्मिन्नित्यनयोरर्थः स्रष्टोद यीत द्विरुक्तसंयोगोजक्षिः तंकृत्वा तेन
२३ नेलांगृहीत्वासव्येपाणौकृत्वानिधायेत्यर्थः अस्याःस्त्रीलायाइत्यर्थः याहस्तेवदायतेसा
वांतरेला अवदापत्नीताध्वर्यु अंतरे ददीत अंगुल्यंगुष्ठयोर्मध्येनप्रदेशेनस्वयमिलाया
अवांतरेला मादद्दीत घत्पाल हत्य घत्पाल्ब्रांस्रष्टामध्वर्युणावेत्यर्थः अं
गुली तांवा अमुष्टिंकृत्वा अंगुलीभ्योबहिरंगुष्ठमकृत्वेत्यर्थः सव्येहस्तेनिहितामिलां
दक्षिणेनहस्तेनगृहीत्वावांतरेलांदक्षिणतःपरिगृह्यास्यसंमितांघ्राणसंमितांवेलांकृत्वा
वानुयक्रयते घ्राणसंमितांनासिकासंमितामित्यर्थः इलोपहू उपहूतइति इलोपहूते
सादिनातस्मिन्नुपहूतइत्यंतेनस्फ पांक्त्यनेननिगदानांतंत्रस्वरत्वादघ्रासुपांसु २३
त्वंविधीयते तेनैकश्रुत्यमनुपरतमेवेतिस्थितं अध्वर्योरित्यनेनोत्तरस्यनिगदभागस्य

तंत्रस्वरानपगमःकथ्यतेघ्रासत्वान्नाश्रुंविधीयतेअतः तस्मिन्ननुच्यमानेसंशयःस्यान्नि
गदमध्येउपांशुत्वमुच्यमानंकिंसर्वस्यनिगदस्य आहोस्वित्पूर्वस्यभागस्यपरस्यवेति
अस्मिंस्तूच्यमानेपूर्वस्यैवभागस्योपांशुत्वंविहितंनवतिनोत्तरस्यभवतीतिनात्रसंशयः
इलोपहूता मनुष्याः देवयुत्रे इतित्रीण्येवसामानि उपहू इतिवा उपहूयेत्यनूच्यमा
नेरुविर्जुषंतामितिनिगदांतस्यात् तस्मिन्नुपहूतइत्यवांतरेलाभक्षणमंत्रःस्यादिले
नागमित्यिव तयोर्विकल्पार्थोवाशब्दः सर्वघुरुषाःसर्वघुरुषाइतिपदद्वयविशिष्टश्च
मंत्रइत्येतेदोषाःस्युः एतस्मिंस्तूच्यमानेतस्मिन्नुपहूतइत्येवमंतोनिगदःस्यात् पू
र्वःइतिशब्दोनिगदैकदेशःस्यात् वाशब्दश्चमंत्रावयवविकल्पार्थएवस्यात् सर्वघुरुषा
इत्यंतइतिशब्दात्तेनेतावानेवमंत्रःस्यात्इत्येवंसर्वसमंजसंभवति होतावांतरेला

नक्षयित्वेजानपिनक्षयेत् सर्वेसयजमानाइज्जानक्षयेयुः इज्जासर्वेषामितिपशुवि
२४ नागेदर्शनात् शाखांतरेवयजमानपंचमाइज्जानक्षयेयुरितिदर्शनाच्च मार्ज्जयिरं
ति मार्ज्जनमिज्जानक्षणांगंपित्र्यायामिज्जानक्षणानावेमार्ज्जनस्यायनावदर्शनात् नक्षयि
तुमार्ज्जनेदृष्ट्वोपकारोस्तिस्मृद्धिर्नामातइज्जांतकर्मस्वपिमार्ज्जनमस्त्येव नेतदनुयाजांगंच
तुर्थकरणदक्षिणादानाभ्यांव्यवहितत्वात् पित्र्यायामनुयाजसत्तायामपितदनावदर्शना
च्च अतोमार्ज्जयित्वानुयाजेष्वरंनीतिवचनंचतुर्थकरणदक्षिणादानयोरनित्यत्वसूचना
र्थं तथास्यनाग्नेयेषुचतुर्थकरणंनास्ति अंगत्वेषुदक्षिणादानंनास्तीति परिजनं आ
हवनीयस्यपरिस्तरणेः नक्षणार्थंनिष्क्रम्यपुनः प्रविशनांप्रथमप्रायत्वान्नेषामासेवयते २४
ऽर्थात्सहकारिणा देवा याजाः देवादयोदेवशब्दयजतिस्पर्धः पुनरनुयाज

वीतवसदांताः१

ग्रहणमुत्तरस्यसूत्रस्यप्रयाजानुयाजार्थत्वायं वीतवसदांतत्वंप्रयाजानुयाजयोर्गुणःस्या
त् त्रयः तेनुयाजास्त्रयोभवंति एकैजंति देवान्यजेतिप्रथमसंप्रेषस्यसर्वार्थत्वेसत्यपिनु
नःप्रेषितएवयजेत् इमेनुयाजाः देवंब वीरीति अनवानंवा अमत्सतेत्यत्रावसायवा
अनवसायवायजेत् कस्मृक्वा संतनुयात् असि स्तो अन्नयंकतो विदि अक्रतेत्वि
अक्रातामक्रतेत्येवंयजमानस्यनामनीर्मानुषाः इत्यवसानानिसर्वाणिनिगदे।अत्रनुप्र
थमाविधानंद्वितीयानिहस्यर्थीआविदीत्यत्रावसायप्रथमयाविनक्त्यादिश्यदेवतामिदंहा
विरित्यपसंतनुयात्।एवमुत्तराः।उत्तराअपिदेवतामादिश्यइदंहविरित्येवमुपसंतनुयात्।।
अक्राथार्थीहिदेवतब्रजदेवतयोरेवमहः कर्तव्यं।यथार्थक्वनं अर्थवशेनाभिधानमि
त्येवमर्थीउक्तमुपांशोः।आवहस्वाहेत्यक्तमित्यर्थः।उक्तस्यवचनमस्यनिगदस्यपशावपी—

ष्टिवदेवप्रयोगार्थीनस्रक्वाकप्रैषवदनुषक्तादीनामुपांशुत्वंभवति।आवादेवेभ्यइति।आवापिकां
तन्नित्येतदावापिकदेवताक्रमप्राप्त्यर्थंतिन्नास्तानित्यत्रापिनिगद्यते।देवाआज्यपाइतियथास्रुवं
।असावसावित्यत्रयजमाननामनीषद्यमयाविभक्त्यानिर्दिशेत्।सांव्यवहारिकंनाक्षत्रंवाहो
तुर्नुस्रुच्चैद्यजमानेःस्यात्तत्सन्निधौउपांशुनामनीक्र्यात्।शंसावोअनुक्तोवोवचनमेकऋत्यप्रा
पणार्थं।अप्रणवामितिप्रणवोनिषिध्यते।वेदस्तैमेप्रयच्छत्यध्वर्युः।वेदग्रहणकालज्ञापनार्थंप्रतस्रु
त्रं।अतोध्वर्युणादक्षेगृह्णीयात्।अदक्षेपिस्वयमेवगृह्णीयात्।तंगृह्णीयेतितमितिविस्पष्टा
र्थंयदाह्वेदद्यात्तदातंगृह्णीयादित्यर्थः।यदाह्वेयुगर्धेद्यात्तदोहनमंत्रंक्र्यात्।वसवस्त्वाछा स ८
दिषुउदासुस्थजंतिएतेनेतिस्वनंप्रकृतिविकारभावेपिकृत्स्नस्यप्रापणार्थं।अर्ज्यस्वनंया २५
ज्येनस्तोमइज्यतेतत्रैतेयाज्यानुवाक्येभवतः।नान्यरूँक्षेसामइतियजंतीतिस्वनंयागएवा

सांदेवतानांनानिगमेधनुहत्तिरितिआधायातानइतियाजाः।इदंसंज्ञाविधानार्थंअथाजेताअ
थशब्दःपक्षांतरयरिग्रहार्थः।अथवेयजमानःप्रजाकामःस्यान्नदैवेतादेवतायजंतीतिप्राग्गृहू
पतेरितिदेशविधानेनश्रुतीनिःसमुच्चयंदर्शयति।एकावाक्यायाज्यानुवाक्यास्वनंप्रजाकामो
यजेतेत्पनेनयजमानेसंनिहितेपिहोतैवकर्तरियान्नयष्टास्यादितियाज्यानुवाक्ययोर्होत्रकर्तृत्व
मन्यतःषसिंहमितिकुरूमहमितिघृतीतेपिस्वयमेवपठतिकुरूमाखितिआज्यंग्रीयात्।
पर्वजिनाद्यपक्षानांतंकार्यंनात्रावांतरेलापाणितलस्थमाज्यमिलेत्मुच्यते।ततःसर्वंग्राह्यं।
दित्यच्यतेशंयुनावा।आज्येलायाऊर्ध्वंशंयुवाकोनवतिनवतिवेत्यध्वर्यूणांसंख्याप्रकाराःसंती भ
तितत्स्वनार्थमेतत्सूत्रंयदिस्याद्धोतापितथाकुर्यादित्येवमर्थं।वेदःपत्नेतिपत्न्यैवेदंप्रदायतो
वाचयतिहोताध्वर्युर्वावेदोसीत्यादिकामायत्वेत्येवमंतंसूत्रं।वाचनमंत्रस्योच्चैःप्रयोगोर्थात्सि

ध्यति।कार्यंतुलिंगजनितमेव।वेदशिष्टावेतायद्विपत्नीघ्रजाग्नेस्यादितिकामयेतेतदावेदस्यजानु
२६ सदृशेनप्रदेशेनपत्नीस्वनाभिमालभेतेतिकाम्यानावेपिवावनंभवत्येव।अथास्यादिति।अथेतिसंब
धार्थः।यद्यनंतरंयोक्रविमोकस्यात्तदैववावनमपीतितेनकाम्यानावेवावनानंतरंयोक्रविमोकः
स्यान्नत्वालंभनमपीति।अस्याऋतियोक्रविमोचनंहोतृकर्तृकमितिदर्शयति।तत्वारोतिातद्यो
क्रंद्विगुणंकृत्वागार्हपत्यात्पत्यक्षाक्षाशाद्वाऽन्मूलायप्रदेशमित्यर्थः।तंनिदध्यात्।योक्रस्यमू
लप्रदेशःपार्श्वःपाशशब्देत्रमूलायथोःप्रदर्शनार्थः।अस्ययोक्रस्योपरिष्टाद्वेदत्रणान्युदगग्रा
णिनिदध्यात्।पुरस्तात्त्रणेभ्यःपुरस्ताच्चत्रणेभ्यःसंभिनेष्वर्णपात्रंनिदध्यात्।अग्निमाऽऽहृति।
अग्निमस्यग्निमन्नाग्नित्यर्थः।तांवाग्निमथ्नातीवावयेत्।यत्यगाशीष्टान्नमंत्रस्य।अथोाग्नित्वा।पूर्ण २६
पात्राऽदकंमृत्पिंडंवातऽऽहरन्तावेवंकुर्वतीवावयति।अत्रोऽक्षणमकुर्वत्यावावनेमंत्रलिंगस्य

विरोधाभावाऽऽऽक्षणमविधीयते।पूर्वत्रतन्मंत्रलिंगादेवाग्निमथनंअकुर्वत्यामंत्रोच्चारणं
नसंभवतीति।नतस्याअग्निमथनंविहितंमार्ज्जयंतामितिवेतिपदमात्रविकल्पः।अथाथेति।
योक्रस्याधस्तात्पल्वंजलिमुत्तानमात्मनश्चसव्यंपाणिमुत्तानंनिधायपूर्णपात्रेणनिनयन्माहंप्रा
जाग्नितांवावयेत्।यथातन्निनीयमानमुदकंरुस्तेष्वेवपतेत्तथानिनयेत्।धाञ्शुस्वत्वमत्र
नाड्रियते।अधस्तादंजलिनिधानस्यादृष्टार्थत्वप्रसंगात्।अत्रपत्नीर्हित्वबर्हिस्सर्वासांवा
वनंकर्त्तव्यं।पतिपत्नियोक्रविमोचनमावर्त्ततेसर्वेषांयोक्राणांद्विगुणीकृत्यनिधानंभवति।
निनयनेसमर्वासांस्वयोक्रसंसृष्टोदकलौकिकायोऽक्षणेपिसर्वासामन्वयः।वावनेवाक्यमंत्र
लिंगजनितकार्यान्नावेपिवाक्यस्यपुरुषस्येवायंसंस्कारइत्यवगंतव्यं।यएतेपत्नीसंबंधाःपा
दार्थास्तेसर्वेपरस्परसंबंधाः।अथशब्देनतच्छब्देनान्येनवाऽनंतस्तेसर्वेसहैवकर्त्तव्याः।नैकै

कश्चाज्येद्गृहीत्वेतिवेदबर्हिस्त्यक्त्वाऽऽहवनीयात्तानिदक्षिणेनहस्तेनाग्नयेदेशंगृहीत्वाआ
२७ विधन्वन्विष्टकेनाकंपयन्गार्हपत्यादारभ्यसव्येनहस्तेनसंततंस्रुवेणाऽऽहवनीयंगच्छतितंतु
वन्वन्निस्त्वास्तरणमंत्रेणागमनमंत्रः।तौतेमंत्रांतेस्तरणंनः।शेषंपठितः।शेषंनिधायेतिक्व
नाज्ञानिनसर्वाणिस्तरितव्यानिनियमेनशेषितव्यानीतिगम्यते।आज्यस्थाल्याःस्रुवेणाज्यमा
दायाहवनीयेस्रुवेलेवजुहुयात्।आहवनीयात्पश्चात्पत्नीशालायांसर्वाण्यग्निकर्माणी
संज्ञैषांहोमानांस्वाहाकारांतैर्मंत्रैःमंत्रांतेस्वाहाकारंकृत्वेत्यर्थः।नत्वेमंत्रेयत्रक्वापिनस्वाहाका
रःपठितःतदांतेस्वाहाकारःकर्तव्यः।यत्रक्वापिपठितंमंत्रमात्रमेवपदानार्थोभवतियत्किंचापिवः
कंचनास्मिंछास्त्रेदेवतोद्देशेनद्रव्यत्यागात्मकोव्यापारोयागोहोमोन्याधानंवेदिस्तरणादयो
वामंत्रेणसाध्यंतेतत्रसर्वत्रस्वाहाकारःकर्तव्यइतिसूत्रार्थः।अन्यत्रेतिक्वनंगार्हपत्यप्रणा

२७

र्थोजपेषितइतिवषट्कारसमुच्चयनिवृत्त्यर्थोएवं।निवाएवंनवोनामैवंप्रकारआहवनीयात्प
त्नीशालोदग्देशेस्थितआज्यंस्रुवेणादायाहवनीयइति।एवंप्रकारविशिष्टःकर्ताएवंभूतस्त्यक्त्व
तेविशेषणपरोयंनिर्देशः।अवक्रश्चेत्यादिविहितविशेषउच्यते।यत्रहोमान्याधानोपस्था
नान्यविहितविशेषाणिविधीयंतेतत्रानेनप्रकारेणकर्तव्यानीत्यर्थः।एकदेशविशेषवाच
येक्षितमात्रमस्माद्गृह्यते।अथाहेति।एकमंत्राणिकर्माणीतिन्यायेनाग्नींद्धेआज्यंतीहोत।
र्व्याहृतिभिरितिनिर्देशंकृत्वापुनःपठतितेनज्ञायतेव्याहृत्यपदेशेनक्रमेणैतेत्रयो
दशेतिजैत्रीयमिति।यमिः।स्यादितिशेषः।ऊर्ध्वेतिक्वनंसंस्राजपेनहोमस्यसंबंधार्थंयत्रसंस्राज
पोक्तितत्रप्रायश्चित्तहोमोपिभवतीति।अतःखंडेष्टयपिसंस्राजपस्यप्रयोज्यत्वात्प्रायश्चित्त
होमोपिप्रयोज्यएव।उपस्थायंतेतीत्यैनैवनिष्क्रामेत्।निष्क्रम्यानियमइत्यर्थःपुनरानियमाइ।

*देवत्रातेहुतावुपस्थायनीर्भेनिष्क्रम्येतित्रीणिकर्माणिसंबंधार्थानि।संबंधादनंतरंकर्मतत्कालमेवभवति।२

त्यर्थः। अर्थस्तुभवेत्सत्यप्रनियमविधानंकर्मप्रध्येयितीर्थेननिष्क्रांतस्याव्याहृत्यादयोनियमा
नभवंतीतितेनयोगमध्येमागंतिरेणनिष्क्रांतस्यापिनियमाभवंत्येवेतिज्ञायते। ऊर्ध्वमोजपः।
अन्वर्थसंज्ञेयंतेनायंसोमेहिषुनभवति। इतिहेतुः। इतिशब्देनात्रेतावत्व मुच्यतेएताव
देवहेतुर्नान्यदितिहोत्यरुणंहेतुरेवैतावत्। आग्नीध्रस्यान्यदपीति॥५॥अथब्रह्मणः॥आ
थब्रह्मोधिकारार्थः। इदानींब्रह्मणोपिविधयोधिक्रियंतइत्यर्थः॥होत्रात्वानि। व्याख्यातानीत्य
र्थः। स्नानात्वमनादिनाशुचिर्भूत्वाब्रह्मत्वंकरिष्यामीत्यापुरितोविहारंप्रविशन्प्राङ्मुखजाव
मनंकुर्यात्कमंगित्वाद्यज्ञोपवीतयरुणंयेत्कमानुषयोरपिकर्मलोर्ध्वनादृतेयज्ञोपवीतीत्ये
वस्यादितिशोत्वयरुणंतुकृत्वर्थमपिअशुचित्वसंपादियन्नद्विरावृत्तिःकर्तव्यमितिएत २८
त्रात्रंविधीयते। अयमपितीर्थनविहारंप्रपन्नइतिप्राङ्क्षेष्टास्पप्राप्तापिनेष्यते। तत्रहेतुर्य

ज्ञमनाइत्फलरंथः। यज्ञमनाइतिकर्मानिमुख्यएवयज्ञमनस्त्वोपपत्तेः। ऊर्ध्वधारणमुप।
वेशांगतयाप्राप्तमदृष्टार्थतापरिहारायेक्यावेदासनमनुवर्तते। तत्रचेत्कर्मेत्यस्यापिकर्म
संबंधात्अव्याहृतिरविशिष्टेवादक्षिणांगतावा। तत्रचेत्कर्मेत्यस्यउत्तरांगत्वेनाविशेषादस्या
पिभवति। नित्यःजतांवा। नित्यतःप्राप्तस्यब्रह्मणोयंनियमउच्यते। ध्रुवाणांव्रजतांचयु।
रुषोणांयानिकर्माणितेषांदक्षिणातोनित्योभवेत्। प्राकृतानामप्राकृतानांचध्रुवाणांनि
त्यंदक्षिणत्वंध्रुवैवैकर्तुशक्यतइतिध्रुवेतुध्रुवएवभवेत्। व्रजतांकर्मसुनित्यंदक्षि
णत्वायव्रजन्नेवभवेत्। ध्रुवाणांव्रजतामितिकर्तृविशेषणेनकर्मणांनित्यत्वमत्रोप
क्रमउन्नत्यापरिसमाप्तेर्दक्षिणत्वसिध्यर्थोवाशब्दःसमुच्चयार्थः। क्वचित्कर्मणिक्वचि
न्निष्ठतिक्वचिद्व्रजतितत्रन्यसांधर्मःपरिगृह्यते। बर्हिःप्रावीयत्रबर्हिर्वेदिवसतीवरीय

रणादिकर्तुर्यादिशमग्निमुखाद्व्रजंतिऋत्विजःतत्र तामेवदिशंप्रत्यंचीकृत्वादक्षिणतोनवे
तासैवतत्रेतिवचनात्।बहिःतिष्ठतामग्निमुखएवप्रत्यंनवेत्।वेष्टाःकर्म्याःअमंत्रेषुकर्मसु
स्नानमासेनंवा।नवेत्।।वाशब्देनैवविकल्पेसिद्धेविकल्पवचनमवश्यंविकल्पसि
द्ध्यर्थंतेनैकस्मिन्नपिप्रयोगेक्वचिदासनंक्वचित्स्नानमिति।तन्यंतौ।तिष्ठावषट्काराःति
ष्ठंतायेषोमावषट्काररहिताश्चतेषुवस्नानमासनंवानवेत्।आसीतान्यत्रा।अन्यत्रेत्यनंतर
सूत्रद्वयविषयादन्यत्रेत्यर्थः।समस्तावियेन।समस्तोपाणीअंगुष्ठौवयस्यसोयंसमस्तपाण्यं
गुष्ठःसव्येनपाणिनादक्षिणंपाणितलप्रदेशंगृह्णीयात्।दक्षिणेनसव्यांगुष्ठंएवंकृतेपा
णीअंगुष्ठौवसमस्तौभवतः।एवंभूतेपाणावग्नीयंपरीत्यतस्यदक्षिणतःकुशेष्वपविशे २९
त्।निरसनंकृत्वा।कुशयुक्तेत्यतिसंनवेतएवासनेघकल्पेतेदक्षिणतइतिसुनर्क्वि

नमाहवनीयस्यैवदक्षिणतोनक्रियमाणस्यकर्मणइत्येवमर्थं।ह्रस्वाजपेत्।उप।
विश्यगुरुणंसह्रउपविश्यपुनरपिकर्मणएवदक्षिणतोनन्नवेत्।आसमासेस्तत्रोप
विशेदिति।एषआशानांएषेमंत्रोब्रह्मजपसंज्ञोभवतिसर्वातिदेशशब्दमनपेक्ष्यसर्वेषुयज्ञे
षुभवति।मंत्रयुक्तंपाकयज्ञेषुपिंडपितृयज्ञार्थंपाकयज्ञानामेतन्मंत्रमितितंत्रशब्दात्वाज्ञेषा
मिति।साग्नौयत्रोपवेशनमित्यग्निघरणयनेनसाग्नित्वेकर्म्मणःघतिपन्नेयत्रोपवेशनंविहि
तंतत्रायंजपोभवति।तदुक्तंभवति।एषजपःसर्वेषुयज्ञेषुघविष्मात्रेभवेत्।अग्निघरणयन
वत्स्वग्निघरणयनोक्तएवन भवति।उपविायते।अनुज्ञालाभार्थंमंत्रेणामंत्रयते।अध्वर्युरि।
त्यर्थः।उपविष्टगुरुंप्रवेशकालज्ञापनार्थंयस्मिन्कालेउपविष्टस्योपवेशनानंतरमध्व
र्युणातिसर्ज्जनंसंभवतितस्मिन्कालेघविशेदित्यर्थः।ब्रह्मत्वंवृत्रेअध्वर्युमंत्रपाठोऽपूर्ण।

इसहितेपियाज्ञावल्क्येनप्रणयेत्येवानुजानीयान्नापःप्रणयेदित्येतदपिब्रूत्वेतिवल्क्येन्द्रा
वापश्चाज्ञप्तेनसहेतिजपित्वेतिपूर्वस्योपांशुत्वायोत्तरस्यचतंत्रस्वरत्वायअतिसृजेदनुजानी
यात्सर्वत्रेतिसर्वेषुनुज्ञावल्क्येनुजस्यविधेःप्रापणार्थंयथादेशाःप्राप्तस्यायंविशेषविधिः।
यस्मैकर्मणेअनुज्ञामिच्छतितदेवानुजानीयान्नप्रणयेत्येवायथाकर्मकर्मनुरूपमादेशाः नी-
कर्तव्याइत्यर्थःप्रणवाद्युच्चैःउत्तरविवक्षार्थंऊर्ध्वंवाप्रणवात्उच्चैर्भवतीत्यर्थःअतऊर्ध्वंना
त्राप्रणीताप्रणयनोपलक्षितात्कालादूर्ध्वंप्राग्विष्णुमंत्रोच्चारणाद्वाग्यतोभवतिआस्तृणति
वल्क्येनअमंत्रेषुपिकर्मस्विन्नवसरेआसनमेवेतिनियमार्थंआमापशोःपशावग्निप्रणे
यनमारभ्यआचारलक्षणाद्वाग्यतोभवेत्सोमेप्रणीयायाःघर्मप्रभृत्यतिषेषंवारभ्यासुब्र ३०
ह्मण्यावाक्नियमःसोमग्रहणंपन्थधिकारात्पन्थनामकएवसोमेस्यादितिनिर्वर्त्यसर्वसो

मेष्वप्रणीतार्थंप्रातरनुवाकलक्षितात्कालादूर्ध्वंआभंतर्यामग्रहयोगात्हरि
याःतथासवनत्रयेपिपुरोळाशश्चारभ्यआपुरोळाशेळायाःस्तोत्रेकारात्स्तोत्रादौस्तु
ध्वनितिउपाकरणंतदादिआशास्त्रयाज्यावषट्कारानुमंत्रणाद्वाग्यतोभवेदित्यर्थःओदानेषु।
पवमानस्तोत्रेषूपाकरणादारभ्यआउद्वयःउद्गीतिसमाप्तिरुच्यते।यच्चावल्क्यःसर्वत्रमंत्रव
तिकर्मणिवाग्यमंभवतिशेषःउक्तादन्योयोविषयस्तत्रायमस्यवाग्यमनंशेषत्वेनुज्ञंभवा
तिआतोवाग्यमनमित्यादिनियमोस्यायधिक्रियतइत्यर्थःआपन्निश्चआपद्यातोदेवाअवंतु
नइतिजपेदिवस्तत्कृत्वादेतस्यायज्ञियमापन्निरित्यृच्यतेआनंतरोक्तैर्नवभिःसूक्तैर्विहित
स्यवाग्यमनस्यत्रिषएतदेवधायाज्ञियमित्यर्थःअन्यत्रैवमृत्याजतिःयत्रमंत्रोविहितएव
वाग्यमनेतदादित्वमात्रमत्रविधीतुशब्दसमन्वयात्जपिससोमेसोमसहितेपिअग्नीषो

मीयप्रणयनेपीत्यर्थः।तत्रवचनंयस्मिन्नहन्यग्निःप्रणीयतेतस्मिन्नेवाह्निकर्मण्यहन्यौतदादि-
वाग्यमनंनसूर्येद्युःप्रणयनेतदादिस्वनियमः।तथाचसद्यस्काले२सूर्येद्यःप्रणीयतेवरुण
प्रघासादिषुदक्षिणासूक्तं।सूक्तग्रहणंव्रजनजपतीतिव्रजनोजपविधानात्व्रजनसमाप्ता
वपिकृत्स्नसूक्तप्रयोगविधानार्थंदक्षिण तोव्रजनेविधानंदक्षिणतोव्रजतएवायंजपःस्या
न्नाग्निंसोमंवाप्रणयतःतदाह्यग्रेणगच्छतीति।।समाप्तऋक्सूक्तं।समाप्तेतिवचनंसमाप्योपवेशना
दियऊर्ध्वंतदेवकुर्यान्नसूक्ताद्दृष्टिंगमनापरिसमाप्तावपीति।आदिग्रहणेनव्रजनजपःपरिग्र
ह्यते।उपवेशनग्रहणेननिरसनमपिगृह्यते।सहचारित्वात्एतत्त्रयमग्निप्रणयनाग्नीषो
मप्रणयनयोरंतेविधीयतेनेनसूत्रेणसाग्नेयत्रोपवेशनमित्यनेनसाग्निप्रणयनेषुपक्त्वा- ३९
दिषुकर्मस्वग्निप्रणयनांतएवव्रजनजपोनान्यत्रेतिनियम्यते।नतुजपः।सोमेयदग्निप्रणः

यनंतदंतेनव्रजनजपोभवति।तत्रनिरसनोपवेशनेएवभवतः।अन्यत्रभवतः।यज्ञभवतःक्रियमा
णपदार्थपरामर्शेविसृष्टवागपियज्ञभवतास्यादितियोगविभागःकृतः।विपाजयात्।विपर्यासो-
मुक्रमः।अंतरितेनिगमनं।मंत्रयोःकर्मणोर्वाविपर्यासेंतरितेमंत्रेकर्मणिवास्वयमुपलक्ष्य।
परेणवाख्यातेदक्षिणंजानुनिपात्यवक्ष्यमाणेनमंत्रेणवक्ष्यमाणेग्रावाजतीर्जुजयात्।सर्व
त्रजानुनिपातनमुपस्तृस्योन्नानत्वाविरोधेनकर्तव्यं।तत्पग्र ग्रावेकेनविरूपकारेणशंवे
क्यादिनोदोषनिबंधतेनो।आख्यातोपलक्षणग्रहणमन्यस्मिन्नपिविषयेयथाकथंचित्।ज्ञा
तेएतत्स्यायज्ञियंभवतीत्येवमर्थंतेनैवभस्मसूत्रस्याथेविगंतव्यः।सर्वेषुत्रेषेषेतत्स्यायज्ञियं।
सामान्यरूपेणभवतियदन्यत्रेषविशेषेविहितंतदस्यापवादकंभवति।विपर्यासांतरित
योरत्रनेदेनयहणान्नद्विषयेविशेषेणाप्यस्यसमुच्चयोभवति।सर्वेषांनैमित्तिकानामयमुत्स

र्ग॥ निमित्तादनंतरंकर्त्तव्यमितिवयस्यउनर्वत्सवताघ्राणेनानंतरंकर्त्तुमसंभवः॥तस्या॥
यावत्संभवमुत्कर्षेनात्यंतमिति॥वाशब्दस्यद्विरुच्चारणंज्ञातएवनिमित्तेएतस्मायश्चित्तेन ३२
पूर्वोक्तसर्वंघायश्चित्तवदज्ञातेपीतिज्ञापनार्थं॥आजतिमित्येकवचनंबजवपिनिमित्तेषु
युगपज्ज्ञातेष्वेकैवाजतिःकर्त्तव्या॥नघतिनिमित्तमितिज्ञापनायाकृत्वापत्येवयजुःक्षिणो॥
आग्नीध्रेषुघ्राणाग्नीध्रीयघ्राणयनास्योमेषिदक्षिणाघ्रावेवदक्षिणाग्न्यर्थत्वादाग्नीध्रीयघ्रा
णयनेस्यासामतःनीयेसर्वाएवायदासर्वेभ्योवेदेभ्योयुगपद्ध्वेषाआगच्छेयुः॥तदासमस्ता॥
न्निरेकाजतिराहवनीयएवकार्या॥एवकारयहणंसमस्ताभिरेकाजतिराहवनीयएवेति
ज्ञापनार्थं॥अविज्ञातइतिस्मार्त्तानांशौचावमनादीनांत्रेषस्यघापणार्थं॥एतेऋगादयःश ३२
ब्दावेदवचनानजातिवचनाघाकघासीति॥घाक्यायाजेत्यइतिस्रुगादापनात्वाकृक

स्रंसंगृह्यतेबर्हिरिधीत्यस्परिधिशब्दस्यदेशापलक्षणार्थत्वात्सर्वतोनिर्हृत्यसंगृह्यतेात
त्रवस्पमालस्त्रैःस्पृष्यति॥अमुंत्रत॥अध्वर्युमाहिंसीर्यजमानंमाहिंसीरित्येवमंतेनमा
त्रयस्त्रनेनपुरस्तान्निर्गतमग्निनिदध्यात्॥एवमुत्तरेष्वपिप्रयोगोऽहव्यः॥वशब्दोमुमादेः
पूर्वेणसमुच्चयार्थः॥दिगनुक्रमणेनप्रतिदिशशब्दार्थसिद्धएवायत्प्रतिदिशंयहलंकरो
तितत्ज्ञापयति॥सर्वदिक्संबद्धंकर्मतेनक्रमेणकर्त्तव्यमिति॥अथेतिनस्वाहाकारांतं
॥तमाहेति॥तमितिघहृतमेवांगारमनिजुज्जयादित्यर्थः॥ ॥घाशित्रायइतिदेवस्यमीतिात
दंस्रुवइति॥कुशेष्वाग्नीयात्॥अग्नेनेति॥अत्रयेत्॥सदित्याहतस्यघत्रियहणार्थंनाक्रिय॥
प्राणस्येति॥अंतर्वेदिकुशेषुप्राग्दंडंघाशित्रंहरणेनिधायाऽसंस्रवादन्याग्नीयात्॥असंस्रवा
दनुदंतैरपीडयन्नित्यर्थः॥आचामतिति॥शौचार्थंआचमनंकृत्वापश्चान्मंत्रेणापःपिबेत्॥

उनरपिधाग्वत्शोचार्थमाचमनंकुर्यात्।इड०जनेत।प्रक्षा०यते अनेनप्रक्षालितेनपाणिशत्रु
३३ रणेनात्मानमभिमुखेनरुस्तेनवतथाकृतेनात्मनःउरतश्चिरपःसिंचेत्।मार्ज्ययिद्ध्यात्।सर्वैः
कर्मभिरिलाप्रक्षणस्यानुच्छेयत्वात्तदंगत्वाच्चमार्ज्जनस्यास्मिन्नवसरेअयमपीलोपक्षयि
त्वामार्ज्जनंचकृत्वाततःपश्चाच्चतुर्धाकरणेकृतेब्रह्मणआनीतंब्रह्मभागंपाणिशत्रुरणे।
भिद्ध्यादित्यर्थः।पश्चात्कु।भागंयस्मिन्देशेपाणिशत्रुरणंनिहितंतस्यपश्चात्कुशेषुयजा।
